A.C. Joshi Library
P.U. Chandigarh

MSS No. 18 Subject Philosophy

Name of MSS Tarkasangraha

Author Not available

Period - - Folios 18 (00a+17)

Script Sanskrit Source Prithipal Singh

Missing Folios

...अरवनूर समीपस्थ गुजा ग्राम वास्तव्यो
... शास्त्री

3185

...का ...गतों
दीनको

तत्त्वसाक्षात्कारे सति देहादावहमभिमानरूपमिथ्याज्ञाननाशे सति दोषाभावात् प्रवृत्त्यभा
वे धर्माधर्मयोरभावात् जन्माभावे पूर्वधर्माधर्मयोरनुभवेन नाशे चरमदुःखध्वंसलक्ष
णो मोक्षो जायते ज्ञानमेव मोक्षसाधनं मिथ्याज्ञाननिवृत्तेर्ज्ञानमात्रसाध्यत्वात्॥ तमेव वि
दित्वातिमृत्युमेति नान्यः पंथा विद्यतेयनायेति साधनांतर निषेधाच्च ननु तत्त्वज्ञानिनोपि तु
विज्ञानं कर्म चोक्तं महामुने इति कर्मणोपि मोक्षसाधनत्वस्मरणात्। ज्ञानकर्मणो समु
च्चय इति चेन्न नित्यनैमित्तकैरेव कुर्वाणो दुरितक्षयं ज्ञानं च विमलीकुर्वन्नभ्यासेन पा
चयेत् अभ्यासात् पक्वविज्ञानः कैवल्यं लभते नर इत्यादिना कर्मणो ज्ञानसाधना
त्वप्रतिपादनात्। ज्ञानद्वारैव कर्म मोक्षसाधनं न साक्षात् तस्मात्पदार्थज्ञानात्मोक्षः
परमं प्रयोजनमिति सर्वं रमणीयम्॥ इति श्रीमदन्नंभट्टोपाध्यायकृततर्कसंग्रह
दीपिका समाप्ताः शुभमस्तु॥ संवत् १८९० आश्वुन शुदि ३ गुरुवासरे लिखतमिदं
पुस्तकं॥। त्रिलोकदास वैष्णव पठनार्थं शुभम्॥ श्रीशुभमस्तु कल्याणमस्तु॥। राम। १९

त० दी
१६

याभावेन साधनतयाप्रतीत्यनंतरं तन्निर्वाहार्थं अवांतरव्यापार तया अपूर्वकल्पनात् ।
कीर्त्तनादिना नाशश्रुतेः न यागध्वंसो व्यापारः लोकव्युत्पत्तिबलात् क्रियायामेव कृतिसा
ध्येष्टसाधनत्वं लिङ्ङाबोध्यत इति लिङ्त्वेन रूपेण विध्यर्थत्वं आख्यातत्वेन प्रयत्नार्थका ।
त्वं पचति पाकं करोतीति विवरणदर्शनात् किं करोतीति प्रश्ने पचतीत्युत्तराच्चाख्यात
स्य प्रयत्नार्थत्वनिष्कर्षात् रथो गच्छतीत्यादौ अनुकूलव्यापारे लक्षणा देवदत्तः पचति ।
देवदत्तेन पच्यते तंडुल इत्यादौ कर्तृत्वकर्मणो नाख्यातार्थत्वं किंतु लकृतैकत्वादीना ।
मेव तयोराक्षेपादेव लाभः प्रजयतीत्यादौ धातोरेव प्रकर्षे शक्तिः उपसर्गाणां द्यो
तकत्वमेव न तत्र शक्तिरस्ति पदार्थज्ञानस्य परमप्रयोजनं मोक्षः तथाहि आत्मा वा ।
रे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुत्या श्रवणादीनां साक्षात्कारहेतुत्व ।
बोधनात् श्रुत्या देहादिविलक्षणात्मज्ञाने सत्यपि असंभावनानिवृत्तेर्युक्त्यनुसंधान
रूपमननसाध्यत्वात् मननोपयोगि पदार्थनिरूपणद्वारा शास्त्रस्यापि मोक्षोपयो १६
गः तदनंतरं श्रुत्योपदिष्टविधिना निदिध्यासने कृते तदनंतरं देहादिविलक्षण ।

आदिशब्देन लोह तथ्यादिसंग्रहः

इष्टसाधनतालिंगककृतिसाध्यताज्ञानस्य काम्यस्थले प्रवर्तकत्वं वि
त जीवित्वस्य नित्यस्थले प्रवर्तकत्वं निमित्तज्ञानजन्यत्वस्य प्रवर्तकत्वं
नैमित्तकस्थले

पाद को लिङादिकृत्यसाध्ये प्रवृत्त्यदर्शनात् कृतिसाध्यताज्ञानं प्रवर्तकं न च विषभक्षणादौ
प्रवृत्तिप्रसंगः इष्टसाधनतालिंगककृतिसाध्यताज्ञानस्य काम्यस्थले विहितकालजीवित्वा
त्वा १ निमित्तज्ञानजन्यस्य नित्यनैमित्तकस्थले प्रवर्तकत्वात् न चाननुगमः स्वविशेषणवत्ताप्र
तिसंधानजन्यत्वस्य अनुगतत्वादिति गुरवः तन्न लाघवेन कृतिसाध्येष्टसाधनताज्ञा
नस्यैव चिकीर्षाद्वारा प्रयत्नजनकत्वात् न च नित्येष्टसाधनत्वाभावात् प्रवृत्तिप्रसंगः
तत्रापि प्रत्यवायपरिहारस्य पापक्षयस्य च फलत्वकल्पनात् तस्मात् कृतिसाध्येष्टसाधन
त्वमेव लिङाद्यर्थः ननु ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र लिङा स्वर्गसाधनं कार्यं प्रतीय
ते यागस्य आशुविनाशिनः कालान्तरभाविस्वर्गसाधनत्वायोगात् यागस्यापि कार्यं अपू
र्वमेव लिङार्थः कार्यं कृतिसाध्यं कृतेः सविषयत्वात् विषयाकांक्षायां यागो विषयत्वेनान्वेति
कस्याकांक्षायां कस्य कार्यमिति नियोज्याकांक्षायां स्वर्गकामपदं नियोज्यपरतयान्वेति कार्यबोद्धा नियोज्यः ते
न ज्योतिष्टोमनामकयागविषयकं स्वर्गकामस्य कार्यमिति वाक्यार्थः संबोध्यते वैदिकलिङा।
यावज्जीवमग्निहोत्रं जुहुयादिति नित्यवाक्येपि अपूर्वमेव वाच्यं कल्प्यते आरोग्यकामो
भेषजपानं कुर्यादित्यादौ लौकिकलिङः [illegible] यागस्याप्ययोग्यता निश्च

नैककार्य... भावप्रसंग ननुगमः याकाम्यस्य तिष्टोमेनस मो यजेत यावज्जीव त्रं जुहुया जीवनेसा कं मित्ति वि कालः नैमि पुत्रेजाते इ सद्दादशा नि वियेत

त॰ दी॰ प्राप्तांतरेण प्रयुक्तस्यार्थांतरं प्रकल्प्य दूषणं छलम्॥ असदुत्तरं जातिः साधर्म्यवैधर्म्योत्कर्षापक
टी र्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसंगप्रतिदृष्टांतानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्य
१५ विशेषोपलब्ध्यनुपलब्धिकारणनित्यानित्यकार्याकार्यसमा जातयः वादिनोऽपजयहे
तुर्निग्रहस्थानं प्रतिज्ञाहानिः प्रतिज्ञांतरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासः हेत्वंतरमर्थांतरं।
निरर्थकमविज्ञातार्थकम् अपार्थकम् अप्राप्तकालं न्यूनमधिकम्॥ पुनरुक्तम् अनन।
नुभाषणम् अप्रतिक्षेपः मतानुज्ञा पर्यनुयोज्योपेक्षणम् निरनुयोज्यानुयोगः अपसिद्धां।
तः हेत्वाभासश्च निग्रहस्थानानि विशेषं सुगमम्। ननु करतलानलसंयोगे सत्यपि प्रतिबंध।
२६ के सति दाहानुत्पत्तेः शक्तिः पदार्थांतरमिति चेन्न प्रतिबंधकाभावस्य कार्यमात्रे कारणत्वेन क्ल
के शक्तेरनुपयोगात् कारणत्वस्यैव शक्तिपदार्थत्वात् ननु भस्मादिना कांस्यादौ शुद्धिदर्शना
त अथ्येय[illegible] शक्तिरंगीकार्येति चेन्न भस्मादिसंयोगसमानकालीनस्य स्पर्शप्रति।
यौगिकयावद्भावसहितभस्मादिसंयोगध्वंसस्य शुद्धिपदार्थत्वात् स्वत्वमपि न पदार्थां
तरं यथेष्टविनियोगयोग्यत्वस्य स्वत्वस्वरूपत्वात् तदवच्छेदकं च प्रतिग्रहादिलब्धत्व।
मेवेति॥ अथ विधिर्निरूप्यते प्रवृत्तिजनकचिकीर्षाजनकज्ञानविषयो विधिः॥ तस्मिति १५

तत्र त्वंताभावस्याप्रतीतिः घटापसारणेच संयोगध्वंससत्वात् प्रतीतिरिति॥ केवलाधिकरणादेवनास्ती
तिव्यवहारोपपत्तौ अभावोनपदार्थांतरमितिगुरुवस्तच्चाभावानंगीकारे वैकल्पस्यनिर्वक्तुमशक्यत्वा।
त् अभावस्याभावोभावएवनातिरिक्तः अनवस्थाप्रसंगात् ध्वंसप्रागभावः प्रागभावध्वंसश्चप्रतियो।
योगेवाभावाभावोतिरिक्त एवतृतीयाभावस्यप्रथमभावरूपत्वात् नानवस्थेतिनवीनाः ननुप्रमा
णप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांतावयवतर्कनिर्णयवादजल्पवितंडाहेत्वाभासछलजातिनि
ग्रहस्थानानांतत्वज्ञानान्निःश्रेयसाधिगमइतिन्यायशास्त्रेषोडशपदार्थानामुक्तत्वात्कथंसप्तैवे।
त्यतआह सर्वेषांसप्तस्वेवांतर्भावइत्यर्थः आत्मशरीरेंद्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभा
वफलसुखदुःखापवर्गास्तुप्रमेयमितित्रयोदशविधिप्रमेयं॥ प्रवृत्तिधर्माधर्मौ रागद्वेष॥
मोहादोषाः रागइच्छाद्वेषोमन्युः मोहः शरीरादावात्मभ्रमः प्रेत्यभावोमरणम् फलंभोगः अ
पवर्गोमोक्षः सचस्वसमानाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसः प्रयोजनंसु
खप्राप्तिदुःखहानिश्च दृष्टांतोमहानसादिः प्रामाणिकत्वेनाभ्युपगतोर्थः सिद्धांतः निर्णयो।
निश्चयः प्रमाणफलम् तत्ववुभुत्सोः कथावादः उभयसाधनवती विजिगीषुकथाजल्पः स्व
पक्षस्थापनहीनावितंडा कथानामनानावक्तृकपूर्वोत्तरपक्षप्रतिपादकवाक्यसंदर्भः अभि।

तः दी० गादावतिव्याप्तिवारणाय सादिरिति प्रतियोगिजन्यः प्रतियोगिसमवायिवृत्तिः ध्वंसस्यावहार
१४ हेतुः ध्वंसः अत्यंताभावं लक्षयति । त्रैकालिक इति अन्योन्याभावेऽतिव्याप्तिवारणाय संसर्गाव
च्छिन्नेति ध्वंसप्रागभावयोरतिव्याप्तिवारणाय त्रैकालिक इति अन्योन्याभावं लक्षयति ता
दात्म्येति प्रतियोगिताऽवच्छेदकमारोप्य संसर्गावच्छिन्नभेदाभेदकप्रतियोगिकयोरत्यंताभा
वान्योन्याभावयोर्वैद्रुल्यं केवलं देवदत्ताभावादेरभाव इति प्रतीत्याविशिष्टाभावः एकत्र
त्वेद्वौ नस्त इति प्रतीत्या द्वित्वावच्छिन्नाभावः संयोगसंबंधेन घटवति समवायसंबंधेन
घटाभावः तन्नत्र घटाभावात् घटत्वावच्छिन्नप्रतियोगिकः सामान्याभावस्यातिरिक्तः ए
वमन्योन्याभावोपि घटत्वावच्छिन्नः पटो नास्तीति व्यधिकरणधर्मावच्छिन्नाभावोऽङ्गी
क्रियते पटे घटत्वं नास्तीति तस्यार्थः अतिरिक्तत्वे सकेवलान्वयी सामवायिकाभावोऽत्यं
ताभाव एव समयविशेषे प्रतीयमानघटाभाववति घटानयनेऽत्यंताभावस्यान्यत्रग
मनाभावेपि अप्रतीतेः घटापसारणे सति प्रतीतेर्भूतले घटसंयोगप्रागभावप्रध्वंस
योरत्यंताभावप्रतीतिनियामकत्वं कल्प्यते घटवति तत्संयोगप्रागभावप्रध्वंसयोरसत्वा १४

त्वं वेगस्थितिस्थापकाः सामान्यगुणाः अन्ये रूपादयो विशेषगुणाः द्रव्यविभाजकोपाधिद्वयसमाना
धिकरणावृत्तिगुणत्वव्याप्यजातिमत्त्वं विशेषगुणत्वं कर्मणो लक्षणमाह चलनेति उत्क्षेपणा।
दीनां कार्यभेदमाह। ऊर्ध्वेति शरीर इति। वक्रतासंपादनमाकुंचनं ऋजुतासंपादकं प्रसार।
णमित्यर्थः सामान्यं लक्षयति। नित्यमिति परमाणुपरिमाणादावतिव्याप्तिवारणायानेकेति
संयोगेऽतिव्याप्तिवारणाय नित्यमिति जलपरमाणुगतरूपेऽतिव्याप्तिवारणाय एकेति अ
नुगतत्वं समवेतत्वं तेन घटाद्यत्यन्ताभावः पटाद्यनुगतोऽपि असमवेत इति नाभावेऽतिव्या
प्तिः विशेषं लक्षयति नित्येति। समवायं लक्षयति नित्य इति संयोगेऽतिव्याप्तिवारणाय नित्य इ
ति आकाशादावतिव्याप्तिवारणाय संबंध इति अयुतसिद्धलक्षणमाह ययोरिति नीलो घट इति
विशिष्टप्रतीतिः विशेषणविशेष्यसंबंधविषया विशिष्टप्रत्ययत्वात् दंडीतिप्रत्ययवत् इति सम
वायसिद्धिः अवयवावयविनाविति द्रव्यसमवायिकारणमवयवस्तज्जन्यद्रव्यमवयवी प्रागभा
वं लक्षयति अनादिरिति आकाशादावतिव्याप्तिवारणाय सांत इति घटादावतिव्याप्तिवार
णायानादिरिति प्रतियोगिसमवायिकारणवृत्तिः प्रतियोगिजनकः भविष्यतीति व्यवहार
हेतुः प्रागभावः ध्वंसं लक्षयति सादिरिति घटादावतिव्याप्तिवारणायानंत इति आका।

त॰ दी॰ रजतत्वस्मृतिपुरोवर्त्तिज्ञानाभ्यामेवप्रवृत्तिसंभवात् उपस्थितेऽपि भेदाग्रहस्यैव सर्वत्र प्रवर्त्तकत्वेन नेदंर
१३ जतमित्यादावतिप्रसंगाभावादिति चेन्न सत्यरजतस्थले पुरोवर्त्ति विशेष्यकरजतत्वप्रकारकज्ञानस्य
लाघवेनप्रवृत्तिजनकतया शुक्तावपि रजतार्थिप्रवृत्तिजनकत्वेन विशिष्टज्ञानस्यैव कल्पनात् अय
थार्थानुभवंविभजते अयथार्थेति स्वप्नस्यमानसविपर्ययरूपत्वान्नत्रैविध्यविरोधः संशयल
क्षणमाह एकेति॥ घटपटाविति संमूहालंबनेऽतिव्याप्तिवारणाय एकेति घटोद्रव्यमित्यादावति
व्याप्तिवारणाय विरुद्धेति घटत्वविरुद्ध पटत्ववानित्यज्ञानेऽतिव्याप्तिवारणाय नानेति विपर्ययल
लक्षणमाह मिथ्येति तदभाववति तत्प्रकारकनिश्चय इत्यर्थः तर्कंलक्षयति व्याप्येति यद्यपित
र्कोविपर्ययेंऽतर्भवति तथापिप्रमाणानुग्राहकत्वात् भेदेन कीर्त्तनं स्मृतिंविभजते स्मृतिरि
ति सुखंलक्षयति सर्वेषामिति सुखमहमित्याद्यनुव्यवसायगम्यसुखत्वादिकमेवलक्षणम्
यथाश्रुतंतुस्वरूपकथनमिति द्रष्टव्यम्। संस्कारं विभजते संस्कार इति संस्कारत्वजातिमान्
संस्कारः वेगस्याश्रयमाह वेगेति वेगत्वजातिमान्वेगः भावनांलक्षयति अनुभवेति।
आत्मादावतिव्याप्तिवारणाय अनुभवेति अनुभवध्वंसेऽतिव्याप्तिवारणाय स्मृतीति स्मृतेरपिसं
स्कारजनकत्वेनवीनैरुक्तम् स्थितिस्थापकंलक्षयति अन्यथेति संख्यादयोशेषैनैमित्तिकद्रव्य १३

इंसे विप्रतिपत्तिं प्रदर्श मीमांसक
मतमुपन्यस्यति नन्विति।

सप्रमाः इति शत्त्वमर्थः अनभ्यासदशायां संशयानुपपत्तेरित्यर्थः प्रामाण्यस्य एतस्य स्वतो ग्राह्यत्वाभावे
एवपक्ष

निश्चयप्रामाण्यस्य।

णाश्रयेऽप्रामाण्यग्राहके त्वर्थः उदाहृतस्थले व्यवसायेऽप्रामाण्यग्राहकस्यापि अनुव्यवसायेन तद्ग्रा-
हकत्वात् स्वतस्त्वसिद्धिः ननु स्वतएवप्रामाण्यं गृह्यते घटमहं जानामीत्यनुव्यवसायेन घटघटत्वयोरिव
तत्संबंधस्यापि विषयीकरणात् व्यवसायरूपप्रत्यासत्तेस्तुल्यत्वात् पुरोवर्त्तिनि प्रकारसंबंधस्यैव
प्रमात्वपदार्थत्वादिति चेन्न स्वतः प्रामाण्यग्रहे जलज्ञानं प्रमा न वेत्यनभ्यासदशायां प्रमात्वसंशयो
न स्यात् अनुव्यवसायेन प्रामाण्यस्य निश्चितत्वात् तस्मात्स्वतो ग्राह्यत्वाभावात्परतो ग्राह्यत्वं तथाहि
प्रथमं जलज्ञानानंतरं प्रवृत्तौ सत्यां जललाभे सति पूर्वोत्पन्नं जलज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वात्।
यन्नैवं तन्नैवं यथाऽप्रमेति। व्यतिरेकिणा प्रमात्वं निश्चीयते द्वितीयादिज्ञानेषु पूर्वज्ञानदृष्टांतेन तत्स
जातीयत्वलिंगेनान्वयव्यतिरेकिणापि गृह्यते प्रमायाः गुणजन्यत्वं उत्पत्तौ परतस्त्वं प्रमासाधा
रणं कारणं गुणः अप्रमासाधारणकारणं दोषः तत्र प्रत्यक्षे विशेषणवद्विशेष्यसन्निकर्षो गुणः
अनुमितौ व्यापकवतिव्याप्यज्ञानं उपमितौ यथार्थसादृश्यज्ञानं शाब्दज्ञाने यथार्थयोग्यताज्ञानं।
मिताद्दूरुनीयं सरोव त्रितिविप्रकाराभावस्य व्यवसायेन अनुपस्थितत्वात् अप्रमात्वं परत एव गृह्यते।
पित्तादिदोषजन्यत्वादुत्पत्तौ परतस्त्वम्। ननु सर्वज्ञानानां यथार्थत्वात् अयथार्थत्वात् अयथार्थ
ज्ञानमेव नास्ति न च शुक्ताविदं रजतमिति ज्ञानात्प्रवृत्तिदर्शनादन्यथाख्यातिसिद्धिरिति वाच्यं

प्रत्यक्षे तु सत्त्वा
भिति एतेन
मीमांसके र
प्रपगतात्वां
प्रामाण्यविप्र
पस्पप्रदर्शित
हेतुतांशोऽप्रति
बाधोदर्शितः ८

प्रामाण्यस्यानु
मानादिनाएव
ग्राह्यत्वमित्य
र्थः ४

व्यतिरेकिव्याप्र
मता निश्चीय
ते अनुमीयते

ग्रहविषयीकरण
दित्यर्थः तथाच
प्रत्यासत्तेरभा
वादप्रमात्वस्या
नुव्यवसायेन ग्र
हणं न संभवति
इतिभावः ६

तः दी
१२

र्गवंति आकांक्षादिमत्पदकदंबकत्वात् मद्वाक्यवत् इत्यनुमानादेव संसर्गज्ञानसंभवात्। शब्दो
न प्रमाणांतरमिति चेन्न। अनुमित्यपेक्षया शाब्दज्ञानस्य विलक्षणस्य शाब्दात्प्रत्येमीत्यनुव्यव-
सायसाक्षिकस्य सर्वसंमतत्वात् नन्वर्थापत्तिरपि प्रमाणांतरमस्ति पीनो देवदत्तो दिवा न भुंक्ते इ-
त्यादिदृष्टे श्रुते च पीनत्वान्यथानुपपत्त्या रात्रिभोजनमर्थापत्त्या कल्प्यते। इति चेन्न। देवदत्तो रात्रौ
भुंक्ते दिवाऽभुंजानत्वे सति पीनत्वात् इत्यनुमानेनैव रात्रिभोजनस्य सिद्धत्वात् शते पंचाश-
दिति संभवोऽप्यनुमानमेव इह वटे यक्षस्तिष्ठतीत्यैतिह्यमपि अज्ञातमूलवक्तृकः शब्द एव चे-
ष्टापि शब्दानुमानद्वारा व्यवहारहेतुरिति न प्रमाणांतरं तस्मात् प्रत्यक्षानुमानोपमानशब्दभेदात्
चत्वार्येव प्रमाणानि ज्ञानानां तत्प्रकारकत्वं स्वतो ग्राह्यं परतो वेति विचार्यते तत्र विप्रतिपत्तिः
ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावत्ज्ञानग्राहकसामग्रीग्राह्यं न वा अत्र विधिकोटिः स्व-
तस्त्वं निषेधकोटिः परतस्त्वं अनुमानग्राह्यत्वेन सिद्धसाधनवारणाय यावदिति इदं ज्ञानं अ-
प्रमेति ज्ञानेन प्रामाण्याग्रहात् बाधवारणाय अप्रामाण्याग्राहकेति इदं ज्ञानं अप्रमेति ज्ञानेन
प्रामाण्याग्रहात् बाधवारणाय अप्रामाण्याग्राहकेति इदं ज्ञानं अप्रमेत्यनुव्यवसायनिष्ठप्रामा-
ण्यग्राहकस्याऽप्रामाण्याग्राहकत्वाभावात् स्वतस्त्वं न स्यात्। अतस्तदिति। तस्मिन् ग्राह्यप्रामा-

ज्ञानग्राहक सामग्रीजन्य विषयत्वं स्वतस्त्वं (left margin gloss)

दितारे

विरुद्धार्थप्रतिपादकवाक्यद्वयं हि विप्रतिपत्ति

१२

परतस्त्वमनुमानादिजन्यग्राह्य विषयः

त्यघटाकांक्षादित्रयमात् शब्दे भ्रमो न स्यात् आकांक्षां लक्षयति॥ पदस्येति योग्यतालक्षणमा
ह। अर्थेति सन्निधिलक्षणमाह पदानामिति। अविलंबेन पदार्थोपस्थितिः सन्निधिः उच्चारणं
तु तदुपयोगितयोक्तम् गौरश्वः इति घटः कर्मत्वं इत्यनाकांक्षोदाहरणं द्रष्टव्यम् वैदकस्य
विशेषमाह। वैदिकमीश्वरोक्तत्वादिति॥ ननु वेदस्यानादित्वात्कथमीश्वरोक्तत्वमिति चेन्न
वेदः पौरुषेयः वाक्यसमूहत्वात् भारतादिवत् न च स्मर्यमाणकर्तृकत्वमुपाधिः गौतमादि
भिः शिष्यपरंपरया वेदेपि कर्तृकत्वस्मरणेन साधनव्यापकत्वात् तस्मात्त्रयो वेदः। अज्ञा
यंत इति स्मृतेश्च ननु वर्णा नित्याः स एव गकार इति प्रत्यभिज्ञावत्वात् तथा च कथं वेदस्यानित्य
त्वमिति चेन्न॥ उत्पन्नो गकारो नष्टो गकार इति प्रतीत्या वर्णानामनित्यत्वात् सोयं गकार इति प्र
त्यभिज्ञायाः सेयं दीपज्वालेतिवत् जात्यावलंबनत्वात् वर्णानां नित्यत्वेपि आनुपूर्वीविशिष्ट
वाक्यस्यानित्यत्वाच्च तस्मादीश्वरोक्तो वेदः मन्वादिस्मृतीनां आचाराणां च वेदमूलकतया प्रामाण्यं स्मृ
ति मूलवाक्यानां इदानीमनध्ययनात् तन्मूलभूता काचिच्छाखा विच्छिन्नेति कल्प्यते ननु पठ्यमान
द॰ वैदिकवाक्यानां नस्य कल्पयितुमशक्यतया विप्रकीर्णवादस्यायुक्तत्वात् नित्यानुमेयो वेदो मूलमि मन्वादिस्मृती
ति चेन्न तथापि वर्णानुपूर्वीज्ञानाभावेन बोधकत्वासंभवात् नन्वेतानि पदानि स्मारितार्थसंस नां॰

वाक्यभेदस्य शाब्दबोधकत्व छ्यो॰

त॰ दी॰ क्तिर्न कल्प्यते सैंधवं वा दो लवणाश्वयोः परस्परसंबंधाभावान्नानाशक्तिकल्पनं लक्षणा त्रिविधा जहल्ल
११ क्षणा अजहल्लक्षणा जहदजहल्लक्षणा चेति यत्र वाच्यार्थस्यान्वयाभावः तत्र जहदिति यथा मंचाः क्रो
शंतीति॥ यत्र वाच्यस्यापि अन्वयः तत्र अजहदितीयथा छत्रिणो गच्छंतीति। यत्र वाच्यैकदेशत्यागेन
एकदेशान्वयः तत्र जहदजहदिति यथा तत्त्वमसीति गौणपि लक्षणैव लक्षमाणगुणसंबंधरूपा।
[illegible]निर्माणक इति व्यंजनापि। शब्दशक्तिमूला लक्षणांतरभूता अर्थशक्तिमूला च अनुमानादि
ना[illegible]सिद्धा तात्पर्यानुपपत्तिर्लक्षणाबीजम् तत्प्रतीतीच्छयाउच्चरितत्वं तात्पर्यम् तात्पर्यज्ञानं।
[illegible]वाक्यार्थज्ञाने हेतुः नानार्थानुरोधात् प्रकरणादिकं तात्पर्यग्राहकम्। द्वारमित्यादौ पिधे।
[illegible]आकांक्षाध्याहारः नन्वर्थज्ञानार्थत्वात् शब्दस्यार्थमविज्ञाय शब्दाध्याहारासंभवात्। अर्थ्या
[illegible]एव युक्त इति चेन्न। पदविशेषजन्यपदार्थोपस्थितेः शाब्दज्ञानहेतुत्वात् अन्यथाघ
[illegible]त्वमानयनेकृतिरित्यत्रापि शाब्दज्ञानप्रसंगात् पंकजादिपदेषु योगरूढी अवय।
[illegible]योगः समुदायशक्ती रूढिः नियतपद्मत्वज्ञानार्थं समुदायशक्तिः अन्यथा कुमु।
[illegible] संगः इतरान्विते शक्तिरिति प्रभाकराः अन्वयस्य वाक्यार्थतया भानसंभवा
अन्व[illegible]ंशेपि शक्तिर्न कल्प्यनीयेति गौतमीयाः। आकांक्षेति। आकांक्षादि ज्ञानमित्यर्थः अ ११

[illegible]धकः सिद्धसाधनेनतुपक्षताविघटकतयाऽऽश्रयासिद्धेरंतर्भवंति निग्रहस्थानांतरमिति नवीनाः ॥ उपमा
[illegible]यति ॥ उपमितीति ॥ शाब्दं लक्षयति ॥ आप्तेति ॥ वाक्यलक्षणमाह ॥ पदेति ॥ पदलक्षणमाह ॥ शक्तमि
तु त[illegible]ऽस्मानुकूलः पदपदार्थसंबंधः शक्तिः साच पदार्थांतरमिति मीमांसकाः तन्निरासार्थमाह ॥
[illegible]ना ॥ डित्थादीनामिव घटादीनामपि संकेत एव शक्तिः न तु पदार्थांतरमित्यर्थः गवादिशब्दानां जा
तावेव शक्तिः विशेषणतया जातेः प्रथमोपस्थितत्वात् व्यक्तिलाभस्तु आक्षेपादिना इति केचित् तन्न ॥ आ
गामानयेत्यादौ वृद्धव्यवहारे सर्वत्रानयनादेर्व्यक्तावेव संभवेजातिविशिष्टव्यक्तावेव शक्तिकल्पनात् ॥
शक्तिग्रहश्च वृद्धव्यवहारेण व्युत्प[illegible]नितस्तु बालो गामानये
त्युत्तमवृद्धवाक्यश्रवणानंतरं मध्यमवृद्धस्य प्रवृत्तिमुपलभ्य गवानयनं च दृष्ट्वा मध्यमवृद्धप्रवृत्ति
जनकज्ञानस्य अन्वयव्यतिरेकाभ्यां वाक्यजन्यत्वं निश्चित्य ॥ अश्वमानय गां बधानेति वाक्यांतरे ॥
आवापोद्वापाभ्यां गोपदस्य गोत्वविशिष्टे शक्तिः अश्वपदस्य अश्वत्वविशिष्टे शक्तिरिति व्युत्प
द्यते । ननु सर्वत्र कार्यपरत्वात् व्यवहारस्य कार्यवाक्येण व्युत्पत्तिः न सिद्धपद इति चेन्न ॥ का
श्यां त्रिभुवनतिलको भूपतिरित्यादौ सिद्धेपि व्यवहारात् विकसितपद्मे मधु पिबति मधुकर
इत्यादौ प्रसिद्धपदसमभिव्याहारात् सिद्धेपि मधुकरादिव्युत्पत्तिदर्शनाच्च लक्षणापि शब्दवृत्तिः ।
शक्यसंबंधो लक्षणा गंगायां घोष इत्यत्र गंगापदवाच्यप्रवाहसंबंधादेव तीरोपस्थितौ तीरेपि श ।

त०दी लक्षयति। साध्येति सत्प्रतिपक्षं लक्षयति यस्येति असिद्धं विभजते असिद्ध इति। आश्रयासिद्धमुदा
१० हरति गगनेति॥ स्वरूपासिद्धमुदाहरति शब्द इति व्याप्यत्वासिद्धस्य लक्षणमाह सोपाधिक
इति उपाधिलक्षणमाह साध्येति उपाधिश्चतुर्विधः केवलसाध्यव्यापकः पक्षधर्मावच्छिन्न
साध्यव्यापकः साधनावच्छिन्नसाध्यव्यापकः उदासीनधर्मावच्छिन्नसाध्यव्यापकश्चेति आ तत्र
द्यः आर्द्रेन्धनसंयोगः द्वितीयो यथा वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्र बहिर्द्रव्यत्वावच्छि
न्नप्रत्यक्षत्वव्यापकं उद्भूतरूपवत्वमुपाधिः तृतीयो यथा ध्वंसो विनाशी जन्यत्वादित्यत्र जन्य
त्वावच्छिन्नानित्यत्वव्यापकं भाववत्वमुपाधिः चतुर्थस्तु प्रागभावो विनाशी प्रमेयत्वादित्यत्र ज
न्यत्वावच्छिन्ननित्यत्वव्यापकं भाववत्वं। बाधितस्य लक्षणमाह यस्येति अत्र बाधितसत्प्रतिपक्षयोः
भाव निश्चयत्वेन सत्प्रतिपक्षस्य विरोधिज्ञानसामग्रीत्वेन साक्षादनुमितिप्रतिबंधकत्व
म् इतरेषां तु परामर्शप्रतिबंधकत्वम् तत्रापि साधारणस्य व्यभिचाराभावतया विरुद्धस्य
सामानाधिकरण्याभावतया व्याप्यत्वासिद्धस्य विशिष्टव्याप्यभावतया असाधारणानुप
संहारिणोर्व्याप्तिसंशयाधायकत्वेन व्याप्तिज्ञानप्रतिबंधकत्वम् आश्रयासिद्धिस्वरूपा
सिद्ध्योः पक्षधर्मताज्ञानप्रतिबंधकत्वम् उपाधिस्तु व्यभिचारज्ञानद्वारा व्याप्तिज्ञानप्रति

व्यतिरेकि व्यतिरेकि॰केवलमुदाहरति पृथिवीति ननु इतरभेदः प्रसिद्धो न वा आद्ये यत्र प्रसि
द्धः तत्र हेतुसत्वे अन्वयित्वं असत्वे असाधारण्यं द्वितीये साध्यज्ञानाभावात् कथं तद्विशिष्टानुमि
तिर्विशेषणज्ञानाभावे विशिष्टज्ञानानुदयात् प्रतियोगिज्ञानाभावात् व्यतिरेकव्याप्तिज्ञानमपि न
स्यादिति चेन्न। जलादित्रयोदशान्योन्याभावानां त्रयोदशसु प्रत्येकं प्रसिद्धानां मेलनं पृथिव्यां
साध्यते त्रयोदशत्वावच्छिन्नसाध्यस्य एकाधिकरणवृत्तित्वमिति भावः नान्वयित्वासाधार
ण्य। प्रत्येकाधिकरणाप्रसिद्धा पृथिव्यां साध्यविशिष्टानुमितिः। साध्याभावव्यापकीभूताभा
वप्रतियोगित्वमिति व्यतिरेकव्याप्तिं निरूपयति यदितरेति पक्षलक्षणमाह संदिग्धेति ननु
श्रवणानंतरभावि मननस्थले अव्याप्तिः तत्र वेदवाक्यैरात्मनो निश्चितत्वेन संदेहाभावा
त्. किंच प्रत्यक्षेपि वह्नौ यत्र कृपा अनुमितिस्तत्र अव्याप्तिरिति चेन्न उक्तपक्षताश्रयत्वस्य प
क्षलक्षणत्वात् सपक्षलक्षणमाह निश्चितेति विपक्षलक्षणमाह निश्चितसाध्याभावेति
एवं सद्धेतुं निरूप्य असद्धेतुं विभजते सव्यभिचारेति। अनुमितिप्रतिबंधकयथार्थज्ञानविषय
त्वं हेत्वाभासत्वं सव्यभिचारं विभजते सविविधेति साधारणं लक्षयति तत्रेति उदाहरति यथे
ति असाधारणं लक्षयति। सर्वेति अनुपसंहारिणो लक्षणमाह अन्वयव्यतिरेकेति विरुद्धं

हेतुसाध्यवत्तयापक्षस्यप्रतिपादकंवचनंनिगमनंपक्षज्ञानंप्रतिज्ञाप्रयोजनंलिंगज्ञानंहे
त॰ दी॰ तुप्रयोजनंव्याप्तिज्ञानमुदाहरणप्रयोजनंपक्षधर्मताज्ञानमुपनयप्रयोजनम्॥३॥
१८। यः पंचावयववाक्यमाह पक्षेति अवयवस्वरूपमाह प्रतिज्ञेति उदाहृतवाक्ये प्रतिज्ञाविशेषमाह
पर्वतोवह्निमानिति साध्यवत्तयापक्षवचनंप्रतिज्ञा पंचम्यंतंलिंगप्रतिपादकंहेतुः व्याप्तिप्रति
पादकमुदाहरणंपक्षधर्मताज्ञानार्थमुपनयः अबाधितत्वादिकंनिगमनप्रयोजनं अनुमि
तिकरणमाह स्वार्थेति ननुव्याप्तिस्मृतिपक्षधर्मताज्ञानाभ्यामेवानुमितिसंभवेविशिष्टपराम
र्शः किमर्थमंगीकर्तव्य इति चेन्न वह्निव्याप्यधूमवानयमिति शाब्दपरामर्शस्थले परामर्श
स्यावश्यकतयालाघवेनसर्वत्रपरामर्शस्यैवकरणत्वात्तज्ज्ञाप्यमानंलिंगंनकरणंलिंगज्ञानमेव
करणम् अतीतादौव्यभिचारात् व्यापारवत्कारणंकरणं इति मते परामर्शद्वाराव्याप्तिज्ञानंक
रणं तज्जन्यत्वे सति तज्जन्यजनको व्यापारः अनुमानमुपसंहरति तस्मादिति लिंगंविभजते।
लिंगमिति अन्वयव्यतिरेकिनंलक्षयति। अन्वयेनेति हेतुसाध्ययोर्व्याप्तिरन्वयव्याप्तिः तदभा
वयोर्व्याप्तिर्व्यतिरेकव्याप्तिः केवलान्वयिनो लक्षणमाह अन्वयमात्रेति। केवलान्वयिसाध्य
कंकेवलान्वयि अत्यंताभावाप्रतियोगित्वंकेवलान्वयित्वं केवलान्वयिनं उदाहरति घटोऽभि
धेय इति ईश्वरप्रमा[illegible]विषयत्वं सर्वपदाभिधेयत्वंच सर्वत्रास्तीति व्यतिरेकाभावः केव
लव्यतिरेकिणोलक्षणमाह। व्यतिरेकमात्रेति॥ साध्याभावसाधनाभावयोर्व्याप्तिः केवल

शिष्टमप्यभावस्य दाहकारणत्ववत् सिसाधयिषाविरहसहकृतसिद्ध्यभावस्यापि अनुमितिकारणत्वं
परामर्शं लक्षयति व्याप्तीति व्याप्तिविषयकं यत् पक्षधर्मताज्ञानं तत्परामर्श इत्यर्थः परामर्शज्ञा
नमभिनीय दर्शयति यथेति अनुमितिमभिनयति तज्जन्यमिति परामर्शजन्यमित्यर्थः व्याप्तेर्लक्ष ति
तत्राग्नि णमाह यत्रेति यत्र धूम इति व्याप्तेरभिनयः साहचर्यनियम इति लक्षणं साहचर्यं सामानाधिक
रण्यं तस्य नियमः हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिरि
त्यर्थः पक्षधर्मतास्वरूपमाह व्याप्यस्येति अनुमानं विभजते अनुमानमिति। स्वार्थानुमितिं द
र्शयति स्वयमेवेति भूयोदर्शनेनेति ननु पार्थिवत्वलोहलेख्यत्वादौ शतशः सहचारदर्शनेपि
हीरके व्यभिचारोपलब्धेः भूयोदर्शनेन कथं व्याप्तिग्रह इति चेन्न व्यभिचारज्ञानविरहसहकृतस
हचारज्ञानस्य व्याप्तिग्राहकत्वात् व्यभिचारज्ञाननिश्चयः शंका च तद्विरहः क्वचित् त
र्कात् क्वचित्स्वतःसिद्ध एव यथा धूमाग्निव्याप्तिग्रहे कार्यकारणभावभंगप्रसंगलक्षणस्त
र्को व्यभिचारशंकानिवर्तकः ननु सकलवह्निधूमयोरसन्निकर्षात् कथं व्याप्तिग्रह इति चेन्न। इति
धूमत्ववह्नित्वरूपसामान्यज्ञानप्रत्यासत्त्या सकलधूमवह्निज्ञानसंभवात् तस्मादिति लिं॥
गपरामर्शादित्यर्थः परार्थानुमानमाह यत्त्विति पञ्चावयवस्यैतत्परार्थानुमानं इति तच्छब्देनान्व

ननु विशेषणविशेष्यभावस्य सन्निकर्षस्य संबंधलक्षणाभावात् कथं संबंधत्वमिति चेन्न।५

त॰ दी दाहरति अभावेति तदुपपादयति घटाभाववदिति भूतले घटो नास्तीत्यत्र अभावस्य विशेषणा

द त्वेंद्रियस्य एतेन अनुपलब्धेः प्रमाणांतरत्वं निरस्तं यद्यत्र घटोभविष्यत् तदा भूतलमिव अद्र

क्ष्यत दर्शनाभावान्नास्ति इति तर्कितप्रतियोगिसत्त्वविरोध्यनुपलब्धिसहकृतेंद्रियेणैव अ

भावज्ञानोपपत्तौ अनुपलब्धेः प्रमाणांतरत्वासंभवात् अधिकरणज्ञानार्थमपेक्षणीयेंद्रि

यस्यैव करणत्वोपपत्तौ अनुपलब्धेः करणत्वस्यायुक्तत्वात् विशेषणविशेष्यभावो विशे

षणविशेष्यस्वरूपमेव नातिरिक्तः संबंधः प्रत्यक्षज्ञानमुपसंहरन् तस्य करणमाह। एव

मिति असाधारणकारणत्वात् इंद्रियं प्रत्यक्षज्ञानकरणमित्यर्थः प्रत्यक्षमुपसंहरति। तस्मा

इति प्रत्यक्षम् दिति अनुमानं लक्षयति अनुमितिकरणमिति अनुमितेर्लक्षणमाह परामर्शेति॥ ननु

रिकेदनमानः संशयोत्तरप्रत्यक्षे अतिव्याप्तिः स्थाणुपुरुषसंशयानंतरं पुरुषव्याप्यकरादिमान् अयमिति परा

मर्शे सति पुरुष एवेति प्रत्यक्षजननात् न च तत्रानुमितिरेवेति वाच्यम्। पुरुषं साक्षात्करो

मीत्यनुव्यवसायविरोधादिति चेन्न पक्षतासहकृतपरामर्शजन्यत्वस्य विवक्षितत्वात् सि

साधयिषाविरहसहकृतसिद्ध्यभावः पक्षता साध्यसिद्धिरनुमितिप्रतिबंधका सिद्धिसत्त्वे

पि अनुमिनोमीति प्रतीत्यां अनुमितिदर्शनात् सिसाधयिषोत्तेजका ततश्चोत्तेजकाभावविशि द

नुभवयमर्थ इत्यर्थः प्रत्यक्षज्ञानस्य लक्षणमाह इंद्रियेति इंद्रियं चक्षुरादिकं अर्थो घटादिः त
योः संनिकर्षः संयोगादिस्तज्जन्यज्ञानमित्यर्थः तद्विभजते तद्द्विविधेति निर्विकल्पकस्य लक्ष
णमाह निःप्रकारकमिति विशेषणविशेष्यसंबंधानवगाहिज्ञानमित्यर्थः ननु निर्विकल्पके
किं प्रमाणमिति चेन्न गौरिति विशिष्टज्ञानं विशेषणज्ञानजन्यं विशिष्टज्ञानत्वात् दंडीति ज्ञा
नवदित्यनुमानस्य प्रमाणत्वात् विशेषणज्ञानस्यापि सविकल्पकत्वेनवस्थाप्रसंगात् नि।
र्विकल्पकसिद्धिः सविकल्पकं लक्षयति सप्रकारकमिति नामजात्यादिविशेषणविशेष्यसंबं
धावगाहिज्ञानमित्यर्थः सविकल्पकमुदाहरति यथेति इंद्रियार्थसन्निकर्षं विभजते प्रत्यक्षे
ति संयोगसन्निकर्षमुदाहरति चक्षुषेति द्रव्यप्रत्यक्षे सर्वत्र संयोगः संनिकर्षः इत्यर्थः आ॥
त्मा मनसा संयुज्यते मन इंद्रियेण इंद्रियमर्थेन ततः प्रत्यक्षज्ञानमुत्पद्यते संयुक्तसमवायमुदा
हरति घटरूपेति तत्र युक्तिमाह चक्षुः संयुक्तेति संयुक्तसमवेतसमवायमुदाहरति रूपत्वे
ति समवायमुदाहरति श्रोत्रेति तदुपपादयति कर्णेति ननु दूरस्थशब्दस्य कथं श्रोत्रसंबंध इ
ति चेन्न वीचीतरंगन्यायेन कदंबगोलकन्यायेन वा शब्दांतरोत्पत्तिक्रमेण श्रोत्रदेशे जातस्य
श्रोत्रसंबंधात्प्रत्यक्षसंभवात् समवेतसमवायमुदाहरति शब्दत्वेति विशेषणविशेष्यभावमु
त्वे

त॰ दी
१
ननु तंतुरूपमपि पटं प्रति कारणं स्यादिति चेन्न अनन्यथासिद्धत्वे सतीति विशेषणात् अनन्यथासिद्ध
त्वं अन्यथासिद्धः विरहः अन्यथासिद्धिश्च त्रिविधा येन सहैव यस्य यं प्रति पूर्ववृत्तित्वमवगम्य
ते तं प्रति तेन तदन्यथासिद्धं यथा तंतुना तंतुरूपं तंतुत्वं च पटं प्रति अन्यं प्रति पूर्ववृत्तित्वे ज्ञात एव।
यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तं प्रति तदन्यथासिद्धं यथा शब्दं प्रति पूर्ववृत्तित्वे ज्ञात एव घटं
प्रति आकाशस्य अन्यत्र क्लृप्त पूर्ववृत्तिन एव कार्यसंभवे तत्सहभूतं अन्यथासिद्धं यथा पाकज
स्थले गंधं प्रति रूपप्रागभावस्य पाकजादन्यत्र गंधं प्रति गंधप्रागभावस्य रचितं पूर्ववृत्तित्वं एवं।
च अनन्यथासिद्ध कार्यनियतपूर्ववृत्तित्वं कारणत्वम् कार्यलक्षणमाह कार्यमिति कारणं वि
भजते कारणमिति समवायिकारणलक्षणमाह यत्समवेतमिति यस्मिन् समवेतमित्यर्थः अ
समवायिकारणलक्षणमाह कार्येणेति कार्येणेत्येतदुदाहरति तंतुसंयोग इति कार्येण प सह
टेन एकस्मिन् तंतौ समवेतत्वात् तंतुसंयोगः पटस्य असमवायिकारणमित्यर्थः कारणेन सह
त्येतदुदाहरति तंतुरूपमिति कारणेन पटेन सहैकस्मिन् तंतौ समवेतत्वात् तंतुरूपं पटरूप
स्य असमवायिकारणमित्यर्थः निमित्तकारणं लक्षयति तदुभयेति समवाय्यसमवायिभि
न्नं कारणमित्यर्थः करणलक्षणमुपसंहरति तदेतदिति प्रत्यक्षलक्षणमाह तत्रेति प्रमाण १

वं

स्य: संस्कार: संस्कारध्वंसेऽतिव्याप्तिवारणाय ज्ञानमिति घटादिष्वत्यंतेऽतिव्याप्तिवारणाय सं
स्कारजन्यमिति अनुभवं लक्षयति तद्भिन्नमिति स्मृतिभिन्नं ज्ञानं अनुभव इत्यर्थः अनुभवं विभ।
जते स चेति द्विविधेति यथार्थानुभवस्य लक्षणमाह तद्वतीति ननु घटे घटत्वमिति प्रमायां अ।
व्याप्तिः घटत्वे घटाभावादिति चेन्न यत्र यत्संबंधोऽस्ति तत्र तत्संबंधानुभव इत्यर्थात् घटत्वेऽपि घ
टसंबंधोऽस्तीति नाव्याप्तिः सैवेति यथार्थानुभव एव शास्त्रे प्रमेत्युच्यत इत्यर्थः अयथार्थं लक्ष
यति तदभाववतीति ननु अयं संयोगी इति प्रमायां अतिव्याप्तिरिति चेन्न यदवच्छेदेन यत्संबं
त धाभावः तदवच्छेदेन तत्संबंधज्ञानस्य विवक्षितत्वात् संयोगाभाववच्छेदेन संयोगज्ञानस्य भ्रम वा
त्वात् संयोगावच्छेदेन संयोगसंबंधस्य सत्वात् नातिव्याप्तिः यथार्थानुभवं विभजते यथार्थे
ति प्रसंगात् प्रमाकरणं विभजते तत्करणमिति प्रमाकरणमित्यर्थः प्रमाकरणं प्रमाणमि।
करः ति प्रमाणसामान्यलक्षणम् करणलक्षणमाह असाधारणेति साधारणकारणे दिक्कालादावति
तिव्याप्तिवारणाय असाधारणेति कारणलक्षणमाह कार्येति पूर्ववृत्तिकारणमित्युक्ते।
रासभादावतिव्याप्तिः स्यादत उक्तं नियतेति तावन्मात्रे कृते कार्ये अतिव्याप्तिः अतः पूर्ववृत्तीति।

त०दी हस्तपुस्तकसंयोगात् कायपुस्तकसंयोगः अव्याप्यवृत्तिः संयोगः स्वात्यन्ताभावसमानाधिकरणत्वमव्याप्य
६ वृत्तित्वं विभागं लक्षयति संयोगेति कालादावतिव्याप्तिवारणाय गुण इति रूपादावतिव्याप्तिवारणाय सं
योगनाशक इति विभागोपि कर्मजो विभागजश्च आद्यो हस्तपुस्तकविभागः द्वितीयः कायपुस्तकवि
भागः परत्वापरत्वयोर्लक्षणमाह परापरेति परव्यवहारकारणं परत्वं अपरव्यवहारकारणं अ
ते परत्वमित्यर्थः विभजते ते द्विविधे इति दिक्कृतयोरुदाहरणमाह दूरस्थेति कालकृते उदाहरति
ज्येष्ठे इति गुरुत्वं लक्षयति आद्येति द्वितीयादिपतनस्य वेगासमवायिकारणकत्वात् वेगे अतिव्याप्ति
वारणाय आद्येति द्रवत्वं लक्षयति स्यन्दनेति स्यन्दनं स्रवणं तेजःसंयोगजन्यं नैमित्तिकं तद्भिन्नं सांसिद्धिकं
पृथिव्यां नैमित्तिकं उदाहरति घृतादाविति तेजसि उदाहरति सुवर्णादाविति स्नेहं लक्षयति चूर्णेति का रति
ति लादावतिव्याप्तिवारणाय गुण इति रूपादावतिव्याप्तिवारणाय पिंडीभावेति शब्दं लक्षयति श्रोत्रेति श्रोत्र चूर्णे रि
य रूपत्वेतिव्याप्तिवारणाय गुणपदं रूपादावतिवारणाय श्रोत्रेति शब्दस्त्रिविधः संयोगजो विभागजः।
शब्दजश्चेति तत्राद्यः भेरीदण्डसंयोगजन्यः द्वितीयो वंशे पाट्यमाने दलद्वयविभागजन्यश्चटचटशब्दः
भेर्यादिदेशमारभ्य श्रोत्रपर्यन्तं द्वितीयादिशब्दाः शब्दजाः बुद्धेर्लक्षणमाह सर्वेति जानामीत्यनुव्यव शब्दाः
सायगम्य ज्ञानत्वमेव लक्षणमित्यर्थः बुद्धिं विभजे सेति स्मृतेर्लक्षणमाह संस्कारेति। भावना

कालादावतिव्याप्तिवारणाय गुण इति रूपादावतिव्याप्तिवारणाय सर्वव्यवहारेति २

दावतिव्याप्तिवारणाय मात्रपदम् पाकजमिति पाकस्तेजःसंयोगस्तेन पूर्वरूपं नश्यति रूपांतरमुत्पद्य
त इत्यर्थः अत्र परमाणुष्वेव पाको न द्व्यणुकादौ आपाकनिःक्षिप्ते घटे परमाणुषु रूपांतरोत्पत्तौ श्याम
घटनाशे पुनर्द्व्यणुकादिक्रमेण रक्तघटोत्पत्तिस्तत्र परमाणवः समवायिकारणं तेजःसंयोगः अ
समवायिकारणम् अदृष्टादिकं निमित्तकारणम् द्व्यणुकादि रूपे कारणरूपमसमवायिकार
णम् इति पीलुपाकवादिनो वैशेषिकाः पूर्वघटस्य नाशं विनैवावयविन्यवयवेषु परमाणुपर्यंतेषु
युगपद्रूपांतरोत्पत्तिरिति पिठरपाकवादिनो नैयायिकाः अत एव पार्थिवपरमाणुरूपादिकम
नित्यमित्यर्थः अन्यत्र जलादावित्यर्थः नित्यगतमिति परमाणुगतमित्यर्थः अनित्यगतमिति
द्व्यणुकादिनिष्ठमित्यर्थः रूपादिचतुष्टयमुद्भूतं प्रत्यक्षम् अनुद्भूतमप्रत्यक्षम् उद्भूतत्वं प्रत्यक्ष
त्वप्रयोजको धर्मः तदभावोऽनुद्भूतत्वम् संख्यां लक्षयति एकेति परिमाणं लक्षयति मानेति
परिमाणं विभजते तच्चेति भावप्रधानो निर्देशः अणुत्वं महत्त्वं दीर्घत्वं ह्रस्वत्वं चेत्यर्थः पृथक्त्वं
लक्षयति पृथगिति इदमस्मात्पृथगिति व्यवहारकारणमित्यर्थः संयोगं लक्षयति संयुक्तेति इ
मौ संयुक्ताविति व्यवहारहेतुरित्यर्थः संख्यादिलक्षणेषु सर्वत्र दिक्कालादौ अतिव्याप्तिवारणाया
साधारणेति संयोगो द्विविधः कर्मजः संयोगजश्च आद्यो हस्तक्रियया पुस्तकसंयोगः द्वितीयो ह

रहितत्व प्रभाभित्तिसंयोगेतिव्याप्तिवारणायविशेषपदंदेयं॥८

तःदी० नसोलक्षणम् मनोविभजते तच्चेति एकैकस्यात्मनः एकैकं मनः इत्यात्मनामनेकत्वान्मनसोप्यनेक।
५ त्वमित्यर्थः परमाणुरूपमिति मध्यमपरिमाणत्वेऽनित्यत्वप्रसंगादित्यर्थः ननु मनोनाणुरूपं किं।
तुविभुः स्पर्शशून्यद्रव्यत्वात् आकाशवत् इतिचेन्न मनसोविभुत्वे आत्मनः संयोगस्यासमवायिका
रणस्याभावात् ज्ञानानुत्पत्तिप्रसंगात् नचविभुद्वयसंयोगोस्तिइतिवाच्यम्। ततः संयोगस्यनित्य
त्वेनसुषुप्त्यभावप्रसंगात् पुरीतत् व्यतिरिक्तप्रदेशात्ममनः संयोगस्यसर्वदाविद्यमानत्वात् अ
नु णुत्वेयदामनः पुरीततिप्रविशतितदासुषुप्तिर्यदानिःसरतितदाज्ञानोत्पत्तिरित्यणुत्वसिद्धिः।
व्याख्यातानिद्रव्याणि। रूपंलक्षयति चक्षुरिति। संख्यादावतिव्याप्तिवारणायमात्रपदम् रूपत्वेऽ
र तिव्याप्तिवारणायगुणपदम् ननु अव्याप्यवृत्तिनीलादिसमुदायएवचित्ररूपं इतिचेन्न रूपस्य
मिति व्याप्यवृत्तित्वनियमात् ननुचित्रपटे अवयवरूपस्यैवप्रतीतिरस्तुइति चेन्न। रूपरहितत्वेनपट।
स्याप्रत्यक्षत्वप्रसंगात् नचरूपवत्समवेतत्वंप्रत्यक्षत्वप्रयोजकम् गौरवात् तस्मात्पटस्यप्रत्यक्ष
त्वानुपपत्त्या चित्ररूपसिद्धिः रसंलक्षयति। रसनेतिरसत्वेऽतिव्याप्तिवारणायगुणपदम्स्यास्त्र सर
प्रमादः। पृथिवीति विभज्याश्रयंदर्शयति पृथिव्यामिति गंधंलक्षयति घ्राणेति गंधत्वेऽतिव्या॥
प्तिवारणायगुणपदम् स्पर्शंलक्षयति त्वगिति। स्पर्शत्वेऽतिव्याप्तिवारणायगुणपदम् संयोगा

प्राचीउदीचीअवाचीप्रतीची

क्षणमाह प्राचीति प्राच्यादिदिगपि कार्यमात्रे निमित्तकारणम् आत्मनो लक्षणमाह। ज्ञानेति आत्मा
नं विभजते स द्विविधेति परमात्मनो लक्षणमाह तत्रेति नित्यज्ञानाधिकरणत्वमीश्वरत्वम् ननु
ईश्वरसद्भावे किं प्रमाणम् न तावत्प्रत्यक्षम् तद्धि बाह्यमांतरं वा नाद्यः अरूपिद्रव्यत्वात् नांत्यः।
आत्मसुखादिव्यतिरिक्तत्वात् नाप्यनुमानं लिंगाभावात् इति चेन्न क्षित्यंकुरादिकं कर्तृजन्यं कार्यत्वा
त् घटवदिति अनुमानस्य प्रमाणत्वात् उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्वं कर्तृत्वम् उ
दि पादानं समवायिकारणम् सकलपरमाणवादिसूक्ष्मदर्शित्वात्सर्वज्ञत्वं यः सर्वज्ञः सर्ववित् इत्याग
मोपि तत्र प्रमाणं जीवस्य लक्षणमाह। जीव इति। सुखादिकं जीवलक्षणम् ननु मनुष्योहं ब्राह्मणो
हमित्यादौ सर्वत्राहं प्रत्यये शरीरस्यैव विषयत्वात् शरीरमेवात्मेति चेन्न शरीरस्य करपादादि
नाशे शरीरनाशादात्मनोपि नाशप्रसंगात् नापींद्रियाणामात्मत्वम् योहं घटमद्राक्षं सोहमिदा
नीं स्पर्शामीत्यनुसंधानाभावप्रसंगात् अन्यानुभूते अन्यस्यानुसंधानायोगात् तस्मादिंद्रि।
यव्यतिरिक्तो जीवः सुखदुःखादिवैचित्र्यात् प्रतिशरीरं भिन्नः स च न परमाणुः शरीरव्यापिसुखा
द्यनुपलब्धिप्रसंगात् न मध्यमपरिमाणं तथा सति अनित्यत्वप्रसंगे कृतनाशाकृताभ्यागमप्र
संगात् तस्माद्विभुर्नित्यो जीवः मनसो लक्षणमाह॥ सुखेति। स्पर्शरहितत्वे सति क्रियावत्वं म।
पादे मे वेदना शिरसि सुखं म
मे

त०दी
४

परमाणावास्यासमवायिकारणस्य नित्यत्वात् ५

स्य तेजसोप्यपरत्वपरत्वावच्छिन्नरिहत्वात् तस्माद्दूरपरदिकत्वाद्वायुरपरत्ववद्दिः इदानीं कार्यरूपपृथिव्यादिच।
तुष्टयस्य उत्पत्तिविनाशक्रमः कथ्यते ईश्वरस्य चिकीर्षावशात्परमाणुषु क्रिया जायते ततः परमाणुद्वय।
संयोगे सति द्व्यणुकमुत्पद्यते त्रिभिर्द्व्यणुकैस्त्र्यणुकम् एवं चतुरणुकादिक्रमेण महती पृथिवी महत्य आ।
पो महत्तेजो महान्वायुरुत्पद्यते एवमुत्पन्नस्य कार्यद्रव्यस्य संजिहीर्षावशात्क्रियया परमाणुद्वयविभागे।
सति द्व्यणुकनाशः ततस्त्र्यणुकस्य ततश्चतुरणुकस्य एवं पृथिव्यादिनाशः असमवायिकारणनाशात् द्व्य।
णुकनाशः समवायिकारणनाशात् त्र्यणुकादिनाशः। इति संप्रदायः सर्वत्रासमवायिकारणनाशाद्द्रव्य।
वै नाशः इति नवीनाः। किं पुनः परमाणुसद्भावे प्रमाणं उच्यते जालसूर्यमरीचिस्थं सूक्ष्मतमं यद्रज उपलभ्यते तत्सा जत्र
वयवं चाक्षुषद्रव्यत्वात् घटवत् त्र्यणुकावयवोपि सावयवं महदारंभकत्वात् तंतुवत् योसौ द्व्यणुकावयवः
तथा च मेरुश स एव परमाणुः स च नित्यः कार्यत्वे नवस्थाप्रसंगात् ननु सृष्टिप्रलयसद्भावे किं प्रमाणम्॥ धाता यथा पूर्वमक
र्षपयोरपि तु। ल्पयदित्यादिश्रुतिः प्रमाणं सर्वकार्यद्रव्यध्वंसस्त्ववान्तरप्रलयः सर्वभावकार्यध्वंसो महाप्रलयः इति विवे
ल्यपरिमाणा कः॥ आकाशं लक्षयति। शब्दगुणमिति॥ ननु आकाशमपि किं पृथिव्यादिवन्नानेत्याह। तच्चैकमिति।
पत्तिः।६॥ भेदे प्रमाणाभावादित्यर्थः एकत्वादेव सर्वत्र शब्दोपलब्धेः विभुत्वमंगीकर्तव्यमित्याह। विभु इति। सर्व
मूर्तद्रव्यसंयोगित्वम् विभुत्वम् मूर्तत्वम् परिच्छिन्नपरिमाणवत्त्वं क्रियावत्त्वं वा विभुत्वादेव आत्मवत् नि
त्यत्वमित्याह नित्यं चेति कालं लक्षयति अतीतेति॥ सर्वाधारः कालः सर्वकार्यनिमित्तकारणं दिशो ल ४
च

न जलमध्यस्थघृतनाशादर्शनेन असति प्रतिबंधके पार्थिवद्रवत्वनाशाग्निसंयोगयोः कार्यकारण॥
भावावधारणात् सुवर्णस्य अत्यंतानलसंयोगे सति अनुच्छिद्यमानद्रवत्वाधिकरणत्वेन पार्थिवत्वा॥
नुपपत्तेः तस्मात्पीतद्रव्यद्रव्यवन्नाशप्रतिबंधकतया द्रवद्रव्यान्तरसिद्धौ नैमित्तिकद्रवत्वाधिकर॥
णतया जलत्वानुपपत्तेः रूपवत्तया वाय्वादिष्वनंतर्भावात्तैजसत्वसिद्धिः तस्योष्णस्पर्शभा॥
स्वररूपयोरुपष्टंभकपार्थिवस्य स्पर्शाभ्यां प्रतिबंधादनुपलब्धिः तस्मात्सुवर्णं तैजसमिति॥
वायुं लक्षयति रूपरहितेति। आकाशादावतिव्याप्तिवारणाय स्पर्शवानिति। पृथिव्यादावति॥
व्याप्तिवारणाय रूपरहितइति ननु प्राणस्य कुत्रांतर्भाव इत्यत आह शरीरेति सचेति। एक॥
एव प्राणः स्थानभेदात्प्राणापानादिशब्दैर्व्यवह्रियत इत्यर्थः स्पर्शानुमेयो वायुः। तथाहि। योयंवायौ
वाति सति अनुष्णाशीतस्पर्शो भासते स स्पर्शः क्वचिदाश्रितगुणत्वात् रूपवत् नचास्य पृथिव्याश्रयः
वत उद्भूतस्पर्शवत्पार्थिवस्योद्भूतरूपवत्त्व नजलतेजसि अनुष्णाशीतत्वात् न विभुचतुष्टयं सर्वत्रोपलब्धि।
नियमात प्रसंगात् न मनः परमाणुस्पर्शस्यातींद्रियत्वात् तस्माद्यः प्रतीयमानस्पर्शाश्रयः सवायुः ननु वा
प्रत्यक्ष युः प्रत्यक्षः स्पर्शाश्रयत्वात् घटवदिति चेन्न उद्भूतरूपवत्त्वस्य उपाधित्वात् यत्र द्रव्यत्वे सति बहिरिंद्रियप्र वत्व
त्यक्षत्वं तत्र उद्भूतरूपवत्वमिति साध्यव्यापकत्वं पक्षे साधनाव्यापकत्वम् न चैवं तप्तवारि।
ति

त॰ दी
३

नन्वुत्पत्तिकालस्य सर्वाधारतया सर्वेषां लक्षणानां कालेतिव्याप्तिरिति चेन्न सर्वाधारताप्रयोजकसंबंधभिन्न
संबंधेन लक्षणत्वस्याभिमतत्वात् पृथिवीं विभजते। साद्विविधेति नित्यत्वं ध्वंसाप्रतियोगित्वम् ध्वं
सप्रतियोगित्वमनित्यत्वम् प्रकारान्तरेण विभजते। पुनरिति। आत्मनो भोगायतनं शरीरम् यदवच्छि
न्नात्मनि भोगो जायते तद्भोगायतनं सुखदुःखान्यतरसाक्षात्कारो भोगः शब्देतरोद्भूतविशेषगुणानाश्रय
त्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वं शरीरेन्द्रियभिन्नो विषयः एवं गंधवत् शरीरं
पार्थिवशरीरं गंधवदिन्द्रियं पार्थिवेन्द्रियम् गंधवान्विषयः पार्थिवविषयः इति तत्तल्लक्षणं बो।
ध्यम् पार्थिवशरीरं दर्शयति शरीरमिति। पार्थिवेन्द्रियं दर्शयति। इन्द्रियमिति गंधग्राहकमिति प्र
योजनकथनम् घ्राणमिति सेत्ता नासाग्रेत्यास्य योक्तिः एवमुत्तरोत्तरं ज्ञेयम् पार्थिवविषयं द
र्शयति, मृत्पाषाणेति अपां लक्षणमाह॥ शीतेति उत्पन्नविनष्टजलेऽव्याप्तिवारणाय शीतस्पर्श स
मानाधिकरणद्रव्यत्वापरजातिमत्वे तात्पर्यम् शीतलं शिलातलमित्यादौ [illegible] जलसंबंधादेव शी।
तस्य भानान्नातिव्याप्तिः अन्यत्सर्वं पूर्वरीत्या व्याख्येयम् तेजसो लक्षणमाह उष्णस्पर्शवदिति। उ।
ष्णं जलमिति प्रतीतेस्तेजःसंबंधानुविधायित्वान्नातिव्याप्तिः विषयं विभजते भौमेति ननु सुवर्णं
पार्थिवं पीतत्वाद्गुरुत्वाच्च हरिद्रादिवत् इति चेन्न अत्यन्तानलसंयोगे सति घृतादौ द्रवत्वनाशदर्शने

दि ८ न्य

त्ति व्याप्तिरतस्तन्निरासाय भिन्नत्वे सतीति द्रव्यकर्मभिन्न इत्युक्ते सामान्यादिष्वति व्याप्तिरत उक्तं सामान्यवानि।
ति। द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुणः गुणत्वजातिमान्वा ननु लघुत्वमृदुत्वकठिनत्वादीनां विद्यमा
नत्वात् कथं चतुर्विंशतिगुणाः इति चेन्न लघुत्वस्य गुरुत्वाभावरूपत्वात् मृदुत्वकठिनत्वयोरवयवसंयो
रूप गविशेषत्वात् कर्माणि विभजते उत्क्षेपणेति संयोगेतिव्याप्तिवारणाय भिन्नत्वे सतीति संयोगभिन्नत्वे
सति संयोगासमवायिकारणं कर्म कर्मत्वजातिमद्वा भ्रमणादीनामपि गमनेंतरभावान्न पंचत्वविरो
धः सामान्यं विभजते। परमिति। परमधिकवृत्ति अपरं न्यूनवृत्ति सामान्यादिचतुष्टये जातिर्नास्ति।
विशेषं विभजते नित्येति पृथिव्यादिचतुष्टयस्य परमाणवः आकाशादि पंच नित्यद्रव्याणि समवायस्य दिव
भेदो नास्तीत्याह समवायस्त्वेक एव अभावं विभजते प्रागभाव इति तत्रोद्देशक्रमानुसारात्पृथमं
मात्र पृथिव्या लक्षणमाह॥ गंधवतीति॥ नाम्ना पदार्थसंकीर्तनमुद्देशः उद्देशक्रमेच सर्वत्रैव नियामि
मिका ननु सुरभ्यसुरभ्यवयवारब्धद्रव्ये परस्परविरोधेन गंधानुत्पादादव्याप्तिः न च तत्र गंधप्रतीत्य
नुपपत्तिरिति वाच्यम् अवयवगंधस्यैव तत्र प्रतीतिसंभवेन चित्रगंधानंगीकारात् किंचोत्पन्नविन
तत्र ष्टघटादावव्याप्तिरिति चेन्न गंधसमानाधिकरणद्रव्यत्वापरजातिमत्त्वस्य विवक्षितत्वात् ननु जलादाव
पि [illegible] गंधवतीति रतिव्याप्तिरिति चेन्न अन्वयव्यतिरेकाभ्यां पृथिवीगंधस्यैव तत्र भानांगीकारात्

...ते स्वनंतरभावात्

वा

तः दी २ शाऽभाँश्च नापि जले शीतस्पर्शाभावात् नीलरूपाश्रयत्वाच्च नापि पृथिव्यां गंधाभावात् स्पर्शरहित॥
त्वाच्च तस्मात्तमो दशमं द्रव्यमिति चेन्न तमसस्तेजोभावरूपत्वात् तथाहि तमोहि न रूपवत् द्रव्यं आ
लोकासहकृतचक्षुर्ग्राह्यत्वात् आलोकाभाववत् रूपिचाक्षुषप्रमायामालोकस्य कारणत्वात् ता।
स्मात्प्रौढप्रकाशकतेजःसमान्याभावस्तमः तत्र नीलं तमश्चलतीति प्रत्ययो भ्रमः अतो नव द्रव्याणीति च
सिद्धं द्रव्यत्वजातिमत्त्वं गुणवत्त्वं वा द्रव्यं इति द्रव्यसामान्यलक्षणं लक्ष्यैकदेशवृत्तित्वं अव्याप्तिः य
था गोः कपिलत्वं अलक्ष्यवृत्तित्वं अतिव्याप्तिः यथा गोः शृंगित्वं लक्ष्यमात्रावर्त्तनमसंभवं यथा
सत्त्वनाति गोरेकशफत्वम् एकखुरत्वं एतद्दूषणत्रयरहितो धर्मो लक्षणं स एव असाधारणधर्म इत्यु
रिक्तजाति च्यते लक्ष्यतावच्छेदकसमनियतत्वं असाधारणधर्मत्वं व्यावर्त्तकस्यैव लक्षणत्वे व्यावृत्ताविभिधे
त्वे सत्यनिय यत्वादौ चातिव्याप्तिवारणाय तद्भिन्नत्वे धर्मविशेषणं देयम् व्यवहारस्य लक्षणप्रयोजनत्वेन देय
तत्वे म् व्यावृत्तेरपि व्यवहारसाधनत्वात् ननु गुणवत्त्वं न द्रव्यलक्षणम् आद्यक्षणे उत्पन्नविनष्टद्र
व्ये चाव्याप्तेरिति चेन्न। गुणसमानाधिकरणसत्ताभिन्नजातिमत्त्वस्य विवक्षितत्वात्। नन्वेवम
प्येकं रूपं रसात्पृथगिति व्यवहारत्वात् रूपादावतिव्याप्तिरिति चेन्न। एकार्थसमवायादेव तादृश
व्यवहारोपपत्तौ गुणे गुण[illegible]तिरूपेति सामान्यवान्नित्यत्वे द्रव्यकर्मगुणेतर २

क्रियत इत्यत आह विधायेति गुरूणां विद्यागुरूणां वंदनं नमस्कारं कृ
त्वानंतरमित्यर्थः ननु बहुषु तर्कग्रंथेषु सत्सु किमर्थमपूर्वग्रंथः क्रियते इत्यत आह। बालानामिति
न्यायमतविस्तरत्वेन [illegible] बालानां बोधो न भवतीत्यर्थः ग्रंथग्रहणधारणापटुर्बालः ननु स्वतंत्रं ध्या
नं कृत्वा निधायेति विश्वेश्वरं जगन्नियंतारं साम्बशिवं हृदि निधाय नितरां स्थापयित्वेत्यर्थः पदा
र्थान् विभजते द्रव्येति [illegible] स्यार्थः पदार्थः इति व्युत्पत्त्याभिधेयत्वं पदार्थसामान्यलक्षणं॥ ननु लाघवे
न भागादेव षट्त्वसिद्धे सप्तग्रहणं व्यर्थमिति चेन्न अधिकसंख्याव्यवच्छेदार्थत्वात् नन्वेवं रिक्तः अ
पदार्थः प्रमितो न वा नाद्यः प्रमितस्य निषेधायोगात् नान्त्यः प्रतियोगिप्रमितिं विना निषेधानुपप
त्तेरिति चेन्न पदार्थत्वं द्रव्यादिसप्तान्यतमत्वव्याप्यमिति व्यवच्छेदार्थत्वात् ननु सप्तान्यतमत्वं स
प्तभिन्नभिन्नत्वमिति वक्तव्यं एवं सप्तभिन्नस्याप्रसिद्धत्वात् सप्तान्यतमत्वं कथमिति चेन्न द्रव्यादिसप्ता
न्यतमत्वं च द्रव्यादिभेदसप्तकाभाववत्त्वमित्युक्तत्वात् एवमग्रेपि द्रष्टव्यं द्रव्यं विभजते। तत्रेति॥
तत्र द्रव्यादिमध्ये द्रव्याणि नवेत्यन्वयः कानि तानीत्यत आह। पृथिवीति ननु तमसो दशमद्र
व्यस्य विद्यमानत्वात् कथं नवद्रव्याणि तथाहि नीलं तमश्चलतीत्यबाधितप्रतीतिबलात् नील
तावक रूपाधारतया दि आधारतया च द्रव्यत्वं सिद्धं तत्र तमसो नाकाशादिपंचकेंतर्भावः नीलरूपवत्
त्वात् अत एव न वाय्वौ सदागतिमत्त्वाभावात् स्पर्शाभावाच्च नापि तेजसि भास्वररूपाभावात् उष्ण
स्पर्शः

TARKASAMGRAHA no. 18

॥ [illegible] श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ ॐ नमस्कृ [illegible] हृनशेषान्। विश्वेश्वरं साम्ब
मूर्तिं प्रणिपत्य गिरं गुरुम्। टीकां शिशुहितां कुर्वे तर्कसंग्रहदीपिकाम्॥१॥ चिकीर्षितस्य ग्रन्थस्य नि
र्विघ्नपरिसमाप्त्यर्थं शिष्टाचारानुमितश्रुतिबोधितकर्त्तव्यताकम् इष्टदेवतानमस्कारलक्षणं मंगलं
[illegible] शिष्यशिक्षायै निबध्नन् [illegible] चिकीर्षितं प्रतिजानीते निधायेति। ननु मंगलस्य समाप्तिसाध
नत्वं नास्ति [illegible] मंगले कृतेऽपि [illegible] समाप्त्यदर्शनात् मंग[illegible] लाभावेऽपि कादम्बर्यादौ समाप्ति
दर्शनात् अन्वयव्यतिरेकव्यभिचारादिति चेन्न किरण[illegible] वल्यादौ विघ्नबाहुल्यात्समाप्त्य
भावः [illegible] ग्रन्थाद्बहिरेव मंगलं कृतं [illegible] व्यभिचारः। ननु मंगलस्य कर्त्तव्यत्वे किं प्रमाण
मिति चेन्न शिष्टाचारानुमितश्रुतेरेव प्रमाणत्वात् [illegible] मंगलं वेदबोधितकर्त्तव्यताकं अ
लौकिकाविगीतशिष्टाचारविषयत्वात् दर्शादिवत् भोजनादौ व्यभिचारवारणायालौकिकेति। रा
त्रिश्राद्धादौ [illegible] व्यभिचारवारणायाविगीतेति शिष्टपदं स्पष्टार्थं नकुर्यान्निष्फलं कर्मेति जलताडनादेर
पि निषिद्ध[illegible] तर्कसंग्रहे प्रतिपाद्यत्वेन इति तर्कः पदार्थाः तेषां [illegible] संक्षेपेण स्वरूपकथ
नं [illegible] [illegible] भोजनादौ [illegible] [illegible] सुखेनानायासेन बोधः पदार्थ

बा